

Aśvaghoṣa

*Buddhacarita* VI,

46-47; 53-57

(Traduzione in S. Lienhard, G. Boccali, a c. d., *Poesia indiana classica*, Marsilio, Venezia 2009, pp. 72-73).

vāsavr̥kṣe samāgamya vigacchanti yathāṇḍajāḥ /

niyataṃ viprayogāntas tathā bhūtasamāgamaḥ // 6.46 //

sametya ca yathā bhūyo vyapayānti balāhakāḥ /

saṃyogo viprayogaś ca tathā me prāṇināṃ mataḥ // 6.47 //

iti tasya vacaḥ śrutvā kanthakas turagottamaḥ /

jihvayā lilihe pādau bāṣpam uṣṇaṃ mumoca ca // 6.53 //

jālinā svastikāṅkena cakramadhyena pāṇinā /

āmamarśa kumāras taṃ  babhāṣe ca vayasyavat // 6.54 //

muñca kanthaka mā bāṣpaṃ  darśiteyaṃ sadaśvatā /

mṛṣyatāṃ saphalaḥ śīghraṃ śramas te 'yaṃ bhaviṣyati // 6.55 //

maṇitsaruṃ chandakahastasaṃsthaṃ tataḥ sa dhīro niśitaṃ gṛhītvā /

kośād asiṃ kāñcanabhakticitraṃ bilād ivāśīviṣam udbabarha // 6.56 //

niṣkāsya taṃ cotpalapattranīlaṃ ciccheda citraṃ mukuṭaṃ sakeśam /

vikīryamāṇāṃśukam antarīkṣe cikṣepa cainaṃ sarasīva haṃsam // 6.57 //

वासवृक्षे  समागम्य  विगच्छन्ति यथाण्डजाः ।

नियतं विप्रयोगान्तस्तथा  भूतसमागमः II 6.46 II

समेत्य च यथा भूयो व्यपयान्ति बलाहकाः ।

संयोगो विप्रयोगश्च तथा मे प्राणिनां मतः II 6.47 II

इति तस्य वचः श्रुत्वा कन्थकस्तुरगोत्तमः ।

जिह्वया लिलिहे पादौ बाष्पमुष्णं मुमोच च ॥ 6.53॥

जालिना स्वस्तिकाङ्केन चक्रमध्येन पाणिना ।

आममर्श कुमारस्तं बभाषे च वयस्यवत् ॥ 6.54 ॥

मुञ्च कन्थक मा बाष्पं दर्शितेयं सदश्वता ।

मृष्यतं सफलः शीघ्रं श्रमस्ते ऽयं भविष्यति ॥ 6.55॥

मणित्सरुं छन्दकहस्तसंस्थं ततः स धीरो निशितं गृहीत्वा ।

मणित्सरुं छन्दकहस्तसंस्थं ततः स धीरो निशितं गृहीत्वा ॥ 6.56 ॥

निष्कास्य तं चोत्पलपत्त्रनीलं चिच्छेद चित्रम्मुकुटं सकेशम् ।

विकीर्यमाणांशुकमन्तरिक्षे चिक्षेप चैनं सरसीव हंसम् ॥ 6.57 ॥